| | | | |
|---|---|---|---|
| तृपः, सन्तर्पी, | तृपः, | तितर्पिषुः, | तरीतृपः ; |
| तर्पितव्यम् , | तर्पयितव्यम् , | तितर्पिषितव्यम् , | तरीतृपितव्यम् ; |
| तर्पणीयम् , | तर्पणीयम् , | तितर्पिषणीयम् , | तरीतृपणीयम् ; |
| [1]तृप्यम् , | तर्प्यम् , | तितर्पिष्यम् , | तरीतृप्यम् ; |
| ईषत्तर्पः-दुस्तर्पः-सुतर्पः ; | | — | — |
| तृप्यमाणः, | तर्प्यमाणः, | तितर्पिष्यमाणः, | तरीतृप्यमाणः ; |
| तर्पः, | तर्पः, | तितर्पिषः, | तरीतृपः ; |
| तर्पितुम् , | तर्पयितुम् , | तितर्पिषितुम् , | तरीतृपितुम् ; |
| तृप्तिः, | तर्पणा, | तितर्पिषा, | तरीतृपा ; |
| तर्पणम् , | तर्पणम् , | तितर्पिषणम् , | तरीतृपणम् ; |
| तर्पित्वा, | तर्पयित्वा, | तितर्पिषित्वा, | तरीतृपित्वा ; |
| प्रतृप्य, | प्रतर्प्य, | प्रतितर्पिष्य, | प्रतरीतृप्य ; |
| तृपम् २, तर्पित्वा २, | तर्पम् २, तर्पयित्वा २, | तितर्पिषम् २, तितर्पिषित्वा २, | तरीतृपम् २ ; तरीतृपित्वा २. |

(773) "तृप तृप्तौ" (X-चुरादिः-1820. सक. सेट्. उभ.) आधृषीयः।

'तृप्तावन्यतरस्यां णौ स्यातां तर्पति तर्पयेत् ॥' (श्लो. 133) इति देवः। 'प्रीणने च' इति कविकल्पद्रुमे। 'सन्दीपने' इति क्षीरस्वामी। आधृषीयत्वेनास्य धातोर्णिज्विकल्पः। तर्पकः-र्पिका, तितर्पयिषकः-षिका, तर्पकः-र्पिका, तितर्पिषकः-षिका, तरीतृपकः-पिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचर्पयतिवत् (554) ज्ञेयानि। णिजभावपक्षे शुद्धाद्धातोः 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदं शता भवतीति विशेषः। [A]तर्पन्-न्ती इति रूपम्।

(774) "तृफ तृप्तौ" (VI-तुदादिः-1307. सक. सेट्. पर.)

'तृप' इत्यस्य धातोः पाठान्तरमिदम्।

तर्फकः-र्फिका, तर्फकः-र्फिका, तितर्फिषकः-षिका, तरीतृफकः-फिका ; इत्यादीनि सर्वाण्यपि तौदादिकतृपतिवत् (772) ज्ञेयानि।

---

1. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति भावकर्मणोः क्यप्।

A. 'प्रजहार हरिं रणेष्वतर्पन् सुदृढं छर्दितमन्युरप्रदर्भन् ॥' धा. का. 3:49.